श्री सूर्यार्या स्तोत्रं (याज्ञवल्क्य कृतं)

श्री सूर्यार्या स्तोत्रं (याज्ञवल्क्य कृतं)

शुकतुंडच्छविसवितुश्चंडरुचेः पुंडरीकवनबंधोः |
मंडलमुदितं वंदे कुंडलमाखंडलाशायाः || 1 ||

यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि |
कुरुतेंजलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः || 2 ||

उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय |
अंबरचूडामणये दिग्वनिताकर्णपूराय || 3 ||

जयति जनानंदकरः करनिकरनिरस्ततिमिरसंघातः |
लोकालोकालोकः कमलारुणमंडलः सूर्यः || 4 ||

प्रतिबोधितकमलवनः कृतघटनश्चक्रवाकमिथुनानां |
दर्शितसमस्तभुवनः परहितनिरतो रविः सदा जयति || 5 ||

अपनयतु सकलकलिकृतमलपटलं सप्रतप्तकनकाभः |
अरविंदवृंदविघटनपटुतरकिरणोत्करः सविता || 6 ||

उदयाद्रिचारुचामर हरितहयखुरपरिहतरेणुराग |
हरितहय हरितपरिकर गगनांगणदीपक नमस्तेऽस्तु || 7 ||

उदितवति त्वयि विलसति मुकुलीयति समस्तमस्तमितबिंबे |
न ह्यन्यस्मिन् दिनकर सकलं कमलायते भुवनं || 8 ||

जयति रविरुदयसमये बालातपः कनकसन्निभो यस्य |
कुसुमांजलिरिव जलधौ तरंति रथसप्तयः सप्त || 9 ||

आर्याः सांबपुरे सप्त आकाशात्पतिता भुवि |
यस्य कंठे गृहे वापि न स लक्ष्म्या वियुज्यते || 10 ||

आर्याः सप्त सदा यस्तु सप्तम्यां सप्तधा जपेत् |
तस्य गेहं च देहं च पद्मा सत्यं न मुंचति || 11 ||

निधिरेष दरिद्राणां रोगिणां परमौषधं |
सिद्धिः सकलकार्याणां गाथेयं संस्मृता रवेः || 12 ||

इति श्रीयाज्ञवल्क्य विरचितं श्री सूर्यार्या स्तोत्रं |